श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीबृहन्नारदीये पुराणे

# ॥ श्री वामनस्तोत्रम् ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री वामनस्तोत्रम् ॥

कश्यप उवाच

नमो नमस्तेऽखिलकारणाय
 नमो नमस्तेऽखिलपालकाय।
नमो नमस्तेऽखिलनायकाय
 नमो नमो दैत्यविनाशनाय॥ १ ॥

नमो नमो भक्तजनप्रियाय
 नमो नमः सज्जनरञ्जिताय।
नमो नमो दुर्जननाशकाय
 नमोऽस्तु तस्मै जगदीश्वराय॥ २ ॥

नमो नमः कारणवामनाय
 नारायणायामितविक्रमाय।
श्रीशार्ङ्गचक्रासिगदाधराय
 नमोऽस्तु तस्मै पुरुषोत्तमाय॥ ३ ॥

नमः पयोराशिनिवासनाय
 नमोऽस्तु ते हृत्कमलासनाय।
नमोऽस्तु सूर्यांशुनिभप्रभाय
 नमो नमः पुण्यकथागताय॥ ४ ॥

नमो नमोऽर्केन्दुविलोचनाय
 नमोऽस्तु ते यज्ञफलप्रदाय।
नमोऽस्तु यज्ञाङ्गविराजिताय
 नमोऽस्तु ते सज्जनवल्लभाय॥ ५ ॥

नमो नमः कारणकारणाय
 नमोऽस्तु शब्दादिविवर्जिताय।

www.prapatti.com

नमोऽस्तु ते दिव्य सुखप्रदाय
नमो नमो भक्तमनोगताय॥ ६ ॥

नमोऽस्तु तस्मै भ्रमनाशनाय
नमोऽस्तु ते मन्दरधारणाय।
नमोऽस्तु ते यज्ञवराहनाम्ने
नमो हिरण्याख्यविदारणाय॥ ७ ॥

नमोऽस्तु ते वामनरूपभाजे
नमोऽस्तु ते क्षत्रकुलान्तकाय।
नमोऽस्तु ते रावणमर्दकाय
नमोऽस्तु ते नन्दसुताग्रजाय॥ ८ ॥

नमस्ते कमलाकान्त नमस्ते सुखदायिने।
स्मृतार्त्तिनाशिने तुभ्यं भूयो भूयो नमो नमः॥ ९ ॥

य इदं वामनस्तोत्रं त्रिसन्ध्यं पठते नरः।
बलारोग्यार्थसन्तानैः तस्य नित्योत्सवो भवेत्॥ १० ॥

॥ इति श्री वामनस्तोत्रं संपूर्णम्॥

www.prapatti.com